नामांक | Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 21

No. of Printed Pages — 7

# SS—12–2—Sans. Sah. II

## उच्च माध्यमिक परीक्षा, 2010

## Senior Secondary Examination - 2010

**वैकल्पिक वर्ग I** ( OPTIONAL GROUP I — HUMANITIES )

## संस्कृत साहित्य — द्वितीय पत्र

## ( SANSKRIT SAHITYA — Second Paper )

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येक प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येक प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) वैदिकसाहित्यस्य समग्रासु रचनासु प्राचीनतमा रचना अस्ति

(अ) सामवेदः (ब) ऋग्वेदः

(स) यजुर्वेदः (द) अथर्ववेदः । $\frac{1}{2}$

(ii) करुणरसप्रयोगे सिद्धहस्तः अद्वितीयः कविः अस्ति

(अ) भवभूति (ब) शूद्रकः

(स) विशाखदत्तः (द) भट्टनारायणः । $\frac{1}{2}$

(iii) महाकविसुबन्धुना विरचितं गद्यकाव्यमस्ति

(अ) दशकुमारचरितम् (ब) कादम्बरी

(स) वासवदत्ता (द) शिवराजविजयम् । $\frac{1}{2}$

(iv) डॉ० प्रभाकरशास्त्रिणा विरचिता कथा अस्ति

(अ) आदर्श दम्पती (ब) उमा

(स) प्रतिवेशिनी (द) आत्मवेदना । $\frac{1}{2}$

2. केषां स्वरवर्णानां वृद्धि संज्ञा भवति ? 1

3. पाणिनीय व्याकरणस्य मूल ग्रन्थस्य नाम किमस्ति ? 1

4. सोदाहरणं व्याख्या कार्या — 3

''स्थानेऽन्तरतमः'' अथवा ''लोपः शाकल्यस्य'' ।

5. अधोलिखित-पदयोः प्रमुखसूत्रनिर्देशपूर्वकं रूपसिद्धिः क्रियताम् — $2\frac{1}{2} + 2\frac{1}{2} = 5$

(i) मद्ध्वरिः **अथवा** मनीषा

(ii) उपेन्द्रः **अथवा** विष्णूदयः ।

6. अभिमुखीकरणार्थे का विभक्तिः भवति ? 1

7. अधोलिखितेषु रेखांकितपदेषु प्रयुक्त विभक्त्याः विधायकं सूत्रं लिखत । 1 + 1 + 1 = 3

(i) बलिं याचते वसुधाम् ।

(ii) हरये रोचते भक्तिः ।

(iii) सर्वस्मिन् आत्मास्ति ।

8. अधोलिखितसूत्रस्य सोदाहरणं व्याख्या करणीया — 2

साधकतमं करणम् ।

**अथवा**

षष्ठी हेतु प्रयोगे ।

9. अधोलिखितेषु अशुद्धवाक्येषु **द्वे** वाक्ये शुद्धं कृत्वा लिखत — 1 + 1 = 2

(i) गृहस्य परितः गृहाणि सन्ति ।

(ii) हिमवता गङ्गा प्रभवति ।

(iii) रामस्य साकं सीता वनं गतवती ।

10. अधोलिखितेषु **द्वयोः** पदयोः संस्कृते वाक्यरचनां कुरुत — 1 + 1 = 2

(i) नमस्करोति

(ii) स्वस्ति

(iii) त्रायते ।

11. वेदान् अपौरुषेयान् के मन्यन्ते ? 1

12. कालिदासस्य किं सर्वस्वम् अस्ति ? 1

13. केन कविना केवलं नायिकायाः अभिधानमेवाधारीकृत्य वासवदत्ता रचिता ? 1

14. सोवियत भूमि नेहरू पुरस्कारेण कः कविः सम्मानितः ? 1

15. कस्मिन् खण्डकाव्ये जयपुरस्य तात्कालिकस्थितेः चित्रणं अस्ति ? 1

16. अधोलिखितेषु कस्यापि एकस्य व्यक्तित्वं कृतित्वञ्च संक्षेपेण लिखत — 3

(i) डॉ० हरिराम आचार्यः

(ii) पं० गणेशराम शर्मा

(iii) डॉ० पुष्करदत्त शर्मा ।

**अथवा**

अधोलिखितरचनानां लेखकानां नामानि लेखनीयानि — $\frac{1}{2}+\frac{1}{2}+\frac{1}{2}+\frac{1}{2}+\frac{1}{2}+\frac{1}{2}=3$

(i) ईश्वरविलासः

(ii) मानवंशम्

(iii) चन्द्रमहीपतिः

(iv) हरनामामृतम्

(v) द्वा सुपर्णा

(vi) सत्यमेव जयते ।

17. अधोलिखितेषु **द्वयोः** गद्यांशयोः सप्रसङ्गं हिन्दीभाषायाम् व्याख्या कार्या—

$(1+3)+(1+3)=8$

(क) ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्राह्मणे नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।

**अथवा**

असतां हृदि प्रविष्टो हि दोषलवः करालायते । सतां न विशत्येव हृदयम् । भूयो यदि कथमपि विशति तदा पारद इव क्षणमात्रं न तिष्ठति । मृगा इव विनोदविन्दोर्वशगा भवन्ति साधवः । सुखं हि जनाः भवादृशाः । शरत्समया इव हरन्ति न च मित्रस्य सचेतना विसदृशमुपदिशन्ति । अचेतनानामपि मैत्री समुचितपक्षे निक्षिप्ता ।

(ख) दौवारिकः — हं हो ! कपटसंन्यासिन् ! कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि ? ते केचनान्ये भवन्ति जारजाताः । ये उत्कोच लोभेन स्वामिनं वञ्चयित्वा आत्मानं अन्धतमसे पातयन्ति न वयं शिवगणास्तादृशाः । ( संन्यासिनो हस्तं धृत्वा ) इतस्तु सत्यं कथय, कस्त्वम् ? कुतः आयातः ? केन वा प्रेषितः ?

**अथवा**

शोकेन विसंज्ञा सर्वं व्यस्मरत् कपोती । तस्याः निश्चला च निरुद्देश्या च दृष्टिः मृतशावके निमग्नाऽऽसीत् । सा प्रतीक्षते स्म पुनरप्येकवारं ''ठाँय'' इति शब्दं श्रोतुम् । स एवासौ क्रूरो ध्वनिर्येन तस्याः प्रियशावकस्येयं दशा कृता, तस्याः जीवनाधारो विच्छिन्नः ।
अहह ! प्रिय शावकस्येव ममापि जीवनस्यान्तं स कुर्यात् ।

18. अधोलिखितेषु **द्वयोः** गद्यांशयोः सप्रसङ्ग संस्कृतभाषायां व्याख्या कार्या—

( 1 + 3 ) + ( 1 + 3 ) = 8

(क) ततो वीरवरेण स्वगृहं गत्वा निद्रायमाणा स्ववधूः प्रबोधिता पुत्रश्च । तौ निद्रां परित्यज्य उत्थायोपविष्टौ । वीरवरः तत् सर्वं लक्ष्मीवचनमुक्तवान् । तत् श्रुत्वा सानन्दः शक्तिधरो ब्रूते — ''धन्योऽहमेवं भूतः, स्वामिराज्यरक्षार्थं यस्योपयोगः । तात ! तत् कोऽधुना विलम्बस्य हेतुः ? एवंविधे कर्मणि देहस्य विनियोगः श्लाघ्यः ।

**अथवा**

तथाहि कस्यचित् राज्ञः सभायां कश्चित् पाचकः समाजगाम । तेन स्वानुरूपां सेवां कर्तुं राजा निवेदितः । राज्ञा पृष्टम् — ''त्वं कस्मिन् कार्ये निपुणो विशेषज्ञो वाऽसि ?''
स खलु पाकशास्त्री न्यवेदयत् — ''राजन् अहं पाकशास्त्रे प्रवीणस्तत्र किमपि कौशलम् आवहामि । भूरिभोगवताम् वैभवशालिनां महाकुले एव अहं महान्तं कालं यावत् पाचकत्वेन सेवाकार्यं समपादयम् ।

(ख) गुणवती गुणवरा तु अतीव विषण्णा सती प्रावोचत्-भगवन् ! सर्वा इमा मम भगिन्य: एव, तत् क्षम्यतां ता इति । तत् श्रुत्वा ता: सर्वा: गुणवरापादयो: पतित्वा क्षमायाचनां चक्रु: । राजा तु गुणवराया: क्षान्तिं क्षमावृत्तिञ्च विलोक्य क्षमादानमकरोत् । राजकुमारञ्च यौवराज्यपदे अभिषिक्तवान् ।

**अथवा**

श्रेयसाम् अभिवादनं मानवस्य साधारणो धर्मोऽस्ति । अर्हाणाम् अभिवादनेन सदृशं संबलं नाऽस्त्यन्यत् त्रिषु लोकेषु । अभिवादनशीलस्य कृते आचारोऽयं सुखसौभाग्यारोग्यादिसम्पद: कल्पवृक्ष इव स्वयं प्रददाति । अभिवादने विनये च स्थितां महतीं शक्तिं जानन्त: सत्पुरुषा: जन्मत: एव सन्तती: पूज्यपूजायै प्रेरयन्ति ।

19. अधोलिखितेषु केषाञ्चित् **चतुर्णां** प्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि — 4 ∞ 1 = 4

(i) ''यथा बीजं तथा फलम्'' पाठानुसारेण प्रियदर्शनसर्पेण शनै: शनै: किम् कवलितम् ?

(ii) ''नेत्रदानं महद्दानम्'' पाठाधारेण राजा केन विधिना याचकाय नेत्रद्वयम् प्रायच्छत् ?

(iii) ''गृहिणी गृहमुच्यते'' अस्मात् पाठात् का शिक्षा मिलति ?

(iv) ''कुविन्दस्य काव्यम्'' पाठानुसारेण केषां त्वंकारयुक्ता वाणी शोभते ?

(v) ''गुरुपदेश:'' पाठानुसारेण जना: भयात् कथं राजवचनमनुसरन्ति ?

(vi) ''वेणुवादक: राजपुत्र:'' पाठानुसारेण चेसप्पा केभ्य: वेणुवादनम् अशिक्षयत् ?

(vii) ''संयम: खलु जीवनम्'' पाठानुसारेण प्रतिष्ठितप्रज्ञ: क: समुच्यते ?

(viii) ''ॐ सह नाववतु । सह नौ भुनक्तु । सहवीर्यं करवावहै ।'' इत्यादय: मन्त्रा: कस्मात् सङ्कलिता: सन्ति ?

20. अधोलिखितेषु कस्यचिदेकस्य विषयोपरि संस्कृते दशवाक्यानां लघुलेखः लेख्यः — 4

(i) अस्मांक राजस्थानम्

(ii) मम प्रियकविः

(iii) यदाहं ग्रामस्य प्रधानो ( सरपंचः ) भविष्यामि ।

21. अधोलिखितेषु कस्यचिदेकस्योपरि संस्कृते पञ्चसप्ततिः शब्दात्मकः लेखः लेखनीयः — 6

(i) संस्कृतभाषायाः गौरवम्

(ii) सत्यस्य महिमा

(iii) आरोग्यं परमं सुखम् ।